# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ७१

राममाश्वासयाने तु लक्ष्मणे भ्रातृवत्सले ।
निक्षिप्य गुल्मान्स्वस्थाने तत्रागच्छद्विभीषणः ॥ १॥

नानाप्रहरणैर्वीरैश्चतुर्भिः सचिवैर्वृतः ।
नीलाञ्जनचयाकारैर्मातङ्गैरिव यूथपः ॥ २॥

सोऽभिगम्य महात्मानं राघवं शोकलालसं ।
वानरांश्चैव ददृशे बाष्पपर्याकुलेक्षणान् ॥ ३॥

राघवं च महात्मानमिक्ष्वाकुकुलनन्दनम् ।
ददर्श मोहमापन्नं लक्ष्मणस्याङ्कमाश्रितम् ॥ ४॥

व्रीडितं शोकसन्तप्तं दृष्ट्वा रामं विभीषणः ।
अन्तर्दुःखेन दीनात्मा किमेतदिति सोऽब्रवीत् ॥ ५॥

विभीषण मुखं दृष्ट्वा सुग्रीवं तांश्च वानरान् ।
उवाच लक्ष्मणो वाक्यमिदं बाष्पपरिप्लुतः ॥ ६॥

हतामिन्द्रजिता सीतामिह श्रुत्वैव राघवः ।
हनूमद्वचनात्सौम्य ततो मोहमुपागतः ॥ ७॥

कथयन्तं तु सौमित्रिं संनिवार्य विभीषणः ।
पुष्कलार्थमिदं वाक्यं विसंज्ञं राममब्रवीत् ॥ ८॥

मनुजेन्द्रार्तरूपेण यदुक्तस्त्वं हनूमता ।
तदयुक्तमहं मन्ये सागरस्येव शोषणम् ॥ ९॥

अभिप्रायं तु जानामि रावणस्य दुरात्मनः ।
सीतां प्रति महाबाहो न च घातं करिष्यति ॥ १०॥

याच्यमानः सुबहुशो मया हितचिकीर्षुणा ।
वैदेहीमुत्सृजस्वेति न च तत्कृतवान्वचः ॥ ११॥

नैव साम्ना न भेदेन न दानेन कुतो युधा ।
सा द्रष्टुमपि शक्येत नैव चान्येन केन चित् ॥ १२॥

वानरान्मोहयित्वा तु प्रतियातः स राक्षसः ।
चैत्यं निकुम्भिलां नाम यत्र होमं करिष्यति ॥ १३॥

हुतवानुपयातो हि देवैरपि सवासवैः ।
दुराधर्षो भवत्येष सङ्ग्रामे रावणात्मजः ॥ १४॥

तेन मोहयता नूनमेषा माया प्रयोजिता ।
विघ्नमन्विच्छता तात वानराणां पराक्रमे ।
ससैन्यास्तत्र गच्छामो यावत्तन्न समाप्यते ॥ १५॥

त्यजेमं नरशार्दूलमिथ्या सन्तापमागतम् ।
सीदते हि बलं सर्वं दृष्ट्वा त्वां शोककर्शितम् ॥ १६॥

इह त्वं स्वस्थ हृदयस्तिष्ठ सत्त्वसमुच्छ्रितः ।
लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः ॥ १७॥

एष तं नरशार्दूलो रावणिं निशितैः शरैः ।
त्याजयिष्यति तत्कर्म ततो वध्यो भविष्यति ॥ १८॥

तस्यैते निशितास्तीक्ष्णाः पत्रिपत्राङ्गवाजिनः ।
पतत्रिण इवासौम्याः शराः पास्यन्ति शोणितम् ॥ १९॥

तत्सन्दिश महाबाहो लक्ष्मणं शुभलक्षणम् ।
राक्षसस्य विनाशाय वज्रं वज्रधरो यथा ॥ २०॥

मनुजवर न कालविप्रकर्षो
रिपुनिधनं प्रति यत्क्षमोऽद्य कर्तुम् ।
त्वमतिसृज रिपोर्वधाय बाणीम्
असुरपुरोन्मथने यथा महेन्द्रः ॥ २१॥

समाप्तकर्मा हि स राक्षसेन्द्रो
भवत्यदृश्यः समरे सुरासुरैः ।
युयुत्सता तेन समाप्तकर्मणा
भवेत्सुराणामपि संशयो महान् ॥ २२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com